that were left were harnessed to the remaining chariot and the two men pursued their journey together. Its teaching is union for mutual advantage. cf. संप्रयोगो वा नष्टाश्वदग्धरथवत्। Kāty. on P. 1. 1. 50; तयोर्नष्टाश्वदग्धरथवत् संप्रयोगः। ŚB. on MS. 2. 1. 1.

**न हि करकङ्कणदर्शनाय आदर्शापेक्षा** One does not need a looking-glass in order to look at a bracelet on the wrist. cf. अहवा हत्थकंकणं किं दप्पणेन पेक्खीअदि। Karpūr.; Marāṭhī "हातच्या कांकणाला आरसा कशाला?"

**न हि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते** If a man has lost a cowrie he does not spend a कार्षापण in the search for it. This will resemble expending a sovereign in order to recover a farthing. cf. न हि कपाले नष्टे तदन्वेषणार्थां इष्टिर्युक्ता। न हि काकिन्यां नष्टायां तदन्वेषणं कार्षापणेन क्रियते॥ ŚB. on MS. 4. 3. 39.

**न हि गोधा सर्पन्ती सर्पणादहिर्भवति** An iguana creeping along does not on that account become a snake. यदप्युच्यते न खल्वन्यत् प्रकृतमनुवर्तनादन्यद्भवति न हि गोधा सर्पन्ती सर्पणादहिर्भवति। भवेद् द्रव्येष्वेतदेवं स्यात्। शब्दस्तु खलु येन येन विशेषेणाभिसंबध्यते तस्य तस्य विशेषको भवति। Mbh. 1. 1. 23; 1. 3. 12; 6. 1. 50.

**न हि ग्रामस्थः कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इव आशास्ते** A man who is already in a village does not express a longing to get there, such as a man might who was out in the jungle! cf. न हि प्राणात्मनि उत्पन्नाभिमानस्य तत्प्राप्त्याशांसनं संभवति। न हि ग्रामस्थः कदा ग्रामं प्राप्नुयामित्यरण्यस्थ इव आशास्ते। असंनिकृष्टविषये ह्यनात्मन्याशंसनं न तत् स्वात्मनि संभवति। Śaṁkara on Bṛi. Up. 1. 3. 28.

**न हि त्रिपुत्रो द्विपुत्र इति कथ्यते** A man who has three sons would not be designated as a man with two sons. Therefore, if an order was given to bring the father of two sons, it would not do to bring one who had three sons. त्रित्वस्य द्वित्वव्यापकत्वेऽपि वाक्यस्य सावधारणत्वात् पुत्रत्रयवतः पुत्रद्वयवत्त्वेऽपि न तस्य द्विपुत्रशब्दवाच्यता। न्यूनसंख्याव्यवच्छेदकत्वेन त्रिशब्दस्य न यथा द्विपुत्रवाचकतेत्येवं यत्र विवक्षा तत्रास्य प्रवृत्तिरिति। लौ. न्याय.

**न हि निन्दा निन्द्यं निन्दितुं प्रयुज्यते किं तर्हि निन्दितादितरत् प्रशंसितुम्** ŚB. on MS. 2. 4. 21. Blame is not employed in order to blame something that is blameworthy, but rather to praise something other than that. न हि निन्दा निन्द्यं निन्दितुं प्रवर्तते अपि तु विधेयं स्तोतुम्। तंत्र.; यथैतरेयकब्राह्मणे 'प्रातः प्रातरनृतं ते वदन्ति' इत्यनुदितहोमनिन्दा उदितहोमप्रशंसार्थेति गम्यते। यथा मानवे (4. 124) ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानवः। सामवेदस्तु पित्र्यः स्यात् तस्मात्तस्याशुचिर्ध्वनिः॥ इति सामवेदनिन्दा इतरवेदप्रशंसार्था। आगमप्रामाण्य.

**न हि पूतं स्याद् गोक्षीरं श्वदृतौ धृतम्** Even cow's milk would cease to be pure if placed in a vessel made of dogskin. Read: शाक्योक्ताहिंसनं धर्मो न वा धर्मः श्रुतत्वतः। न धर्मो न हि पूतं स्याद् गोक्षीरं श्वदृतौ धृतम्॥ ब्रह्मचर्यमहिंसां चापरिग्रहं च सत्यं च यत्नेन रक्षेदिति श्रुतावहिंसादिर्धर्मत्वेनोक्तः। स एव धर्मः शाक्येनाप्युक्तः। तस्माच्छाक्यस्मृतिर्धर्मे प्रमाणमिति चेत्। न। स्वरूपेण धर्मस्यापि गोक्षीरन्यायेन शाक्यसंबन्धे सत्यधर्मत्वप्रसंगात्। तदीयग्रन्थेनाहिंसादिः नावगन्तव्यः। तस्मान्न सा स्मृतिर्धर्मे प्रमाणम्। J. N. V. 1. 3. 4; सन्मूलमप्यहिंसादि श्वदृतिनिक्षिप्तक्षीरवदनुपयोग्यं विस्रम्भणीयं च। तंत्र. 1. 3. 7.

**न हि भिक्षुकाः सन्तीति स्थाल्यो नाधिश्रीयन्ते न च मृगाः सन्तीति यवा नोप्यन्ते** Men do not refrain from setting the cooking pots on the fire because there are beggars [who may ask for some of the contents], nor do they abstain from sowing barley because there are wild animals which may devour it. cf. Mbh. 1. 1. 39; 4. 1. 1; 6. 1. 13. दोषभीतेरनारम्भः तत्कापुरुषलक्षणम्। कैरजीर्णभयाद् भ्रातर्भोजनं परिहीयते॥ H. 2. 56; cf. Marāṭhī proverb "कां न सदन बांधावें कीं त्यांत पुढें बिळें करिल घूस।" मोरोपंत.

**न हि यद् देवदत्तस्य युध्यमानस्य स्थानमवगतं तदेव भुञ्जानस्यापि भवति** The position occupied by देवदत्त when eating is not that which he occupies when fighting. Read: एकत्वेऽपि हि शब्दस्य शक्तिभेदः प्रयोजने। तत्र कार्यान्तरस्थानं न स्यात् कार्यान्तरेष्वपि॥ न शब्दैकत्वेन यत् किंचित् कार्ये स्थानं दृष्टसामर्थ्यं तदेवान्यत्रापि इति शक्यते वक्तुम्। न हि यद् देवदत्तस्य ... भवति इति गम्यते। कार्यप्रयुक्ता हि स्थानविशेषादयो न स्वरूपप्रयुक्ताः। तंत्र.

**न हि वरविघाताय कन्योद्वाहः** The bride is not married for the destruction of the bride-groom. विषकन्यायां वृतायां यत्र वरस्य घातः संभाव्यते तत्र तां नोद्वहेदेवं विवक्षायामस्य प्रवृत्तिः। तथा चानिष्टान्तरपातादिसंभावनायामभीष्टहेतुरपि वस्तु न वरणीयमित्येवं तन्न्यायतात्पर्यम्। अयमेव न्यायः क्वचित् न हि वरघाताय कन्यामुद्वाहयतीति न्यायतया पठ्यते। तारानाथ.

**न हि विधिशतेनापि तथा पुरुषः प्रवर्तते यथा लोभेन** Not even a hundred injunctions could move a man to action as readily as the desire for gain does. cf. क्रियाफलं कर्तारमभिप्रैति। याजका यजन्ति गा लप्स्यामहे इति। कर्मकराः कुर्वन्ति पादिकमहर्लप्स्यामह इति। Mbh. 1. 3. 72; ऋत्विग्भ्यो दक्षिणां दद्यादिति दानं विधीयते। लोभादेवार्जनाङ्गत्वात् प्राप्तस्तेषां प्रतिग्रहः॥ न हि दद्यादित्यस्य प्रतिगृह्णीयादित्ययमर्थो भवति। भवेदपि सामर्थ्याद्यदि तदाक्षेपमन्तरेण दानाविधिर्नोपपद्यते। स तु लोभप्राप्तिप्रतिग्रहबलेनोपपद्यमानो न शक्नोत्याक्षेप्तुम्। न हि ...... यथा लोभेन। तंत्र. 3. 4. 34.

**न हि विवाहानन्तरं वरपरीक्षा** cf. ऊषरवृष्टिन्याय, अरण्यरोदनन्याय, पिष्टपेषणन्याय etc. of the same import. यत्र क्रिया निष्फला तत्रास्य न्यायस्य प्रवृत्तिः। "Doctor after death."

**न हि श्यामाकबीजं परिकर्मसहस्रेणापि कलमाङ्कुराय कल्पते** Not even by the employment of a thousand different processes can Śyāmāka grain be made to germinate as rice. cf. न हि जातु वटाङ्कुरः कुटजबीजाज्जायते। न खलु कुटजबीजाद् वटाङ्कुरो जायते। भामती 1. 2. 18; 4. 1. 1; अन्यदुप्तं जातमन्यदित्येतन्नोपपद्यते। उप्यते यद्धि यद् बीजं तत्तदेव प्ररोहति॥ Ms. 9. 40; "Whatsoever a man soweth that shall he also reap."